# Shri Vivekananda Stotram

# શ્રીવિવેકાનન્દસ્તોત્રમ્

## Document Information

Text title : Shri Vivekananda Stotram

File name : vivekAnandastotram4.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Dakshinaranjana Bhattacharya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીવિવેકાનન્દસ્તોત્રમ્

જીવસેવાવ્રતં યસ્ય લક્ષ્યમાસીન્મહીતલે
    જ્ઞાનમાત્મગતં યો વૈ તેન માર્ગેણ સઙ્ગતઃ ।
કર્મિણે જ્ઞાનિને ચૈવ ભક્તાય સ્વામિને પુનઃ
    વિવેકાનન્દરૂપાય ભૂયો ભૂયો નમામ્યહમ્ ॥ ૧॥

યત્સેવાવ્રતમામનન્તિ મુનયો બુદ્ધો જિનઃ શઙ્કરઃ
    શ્રીરામઃ કમનીયકામ્યકવને વૃન્દાવને માધવઃ ।
જાહ્નવ્યાઃ સુતટેષુ ગૌડ઼ગહને ગૌરાઙ્ગદેવસ્તથા
    તત્સેવાવ્રતમદ્ય સાધકવરઃ સ્વામી પુનર્ઘોષતે ॥ ૨॥

દેવા નાગાશ્ચ યક્ષાઃ ખગભુજગગણાશ્ચાપ્સરોરંશભૂતા
    ગન્ધર્વા રાક્ષસા યે સકલભુવનજાશ્ચાસુરા વૃક્ષજાતાઃ ।
શત્રુર્મિત્રં ચ યે વા નિખિલનરકજા યાતનાસ્થાશ્ચ જીવા
    આબ્રહ્મ સ્તમ્બરૂપં જગદિદમખિલં તૃપ્યતાં તૃપ્યતાં ભોઃ ॥ ૩॥

ચણ્ડાલો બ્રાહ્મણો વા ગુરુરુત વયસા લાઘવઃ પણ્ડિતો વા
    મૂર્ખો દીનો ધનાઢ્યઃ સકલગુણગણૈરન્વિતો નિર્ગુણો વા ।
સર્વે નારાયણાસ્તે વયમપિ ચ તથા યૂયમપ્યત્ર ભૂતા
    આત્મા નારાયણોઽયં પ્રચરતિ બહુશઃ સેવ્યતામાત્મરૂપઃ ॥ ૪॥

દ્વારે ભિક્ષુર્બુભુક્ષુઃ કથયતિ કરુણં “મુષ્ટિનેયં કદન્નં”
    ક્ષુદ્રો માર્જારકો મે વિલપતિ નિતરાં “દેહિ મે મત્સ્યખણ્ડમ્” ।
તે સર્વે ભૂતજાતાઃ સમમપિ જગતાં સેવિતાશ્ચેદ્ભવેયુ-
    ર્નૂનં સૈવાત્મસેવા ભવતિ ચ સકલા નાન્યતાઃ સેવનાન્મે ॥ ૫॥

એવં પુત્રાશ્ચ દારાઃ સકલપરિજના બાન્ધવાશ્ચાર્થરાશિઃ
    સર્વં યદ્વાસ્મદીયં ભવતિ ચ ભુવને તત્તુ નારાયણાર્થમ્ ।
વાક્યં કાયો મનો મે ભવતિ ભગવતા ચાલિતં હૃદ્ગતેન
    દીનોઽહં ભગવન્ તવૈવ નિયતં દાસોઽસ્મિ દાસાધમઃ ॥ ૬॥

દાસોઽહં ભવતો ગૃહાણ કૃપયા મત્કર્મલબ્ધં ફલ-
મેવં કર્મફલં સમર્પ્ય ભગવન્નારાયણોદ્દેશતઃ ।
મુક્તઃ કર્મફલાદ્વિશુદ્ધહૃદયો યોગે મનો દીયતાં
મુક્તિં બન્ધનતો લભસ્વ નિયતાં "કસ્ત્વં" પુનશ્ચિન્ત્યતામ્ ॥ ૭॥

નાહં કાયો જઘન્યઃ કફમલસહિતઃ પઞ્ચભૂતાત્મકો વા
નાહં છેદ્યો ન દાહ્યો ન ચ મરણવશો નાપિ જાતઃ કદાચિત્ ।
નાહં કર્મી ન ભક્તો ન ચ સુખમપિ વા દુઃખલેશો મદીયઃ
સોઽહં યઃ ષષ્ઠચક્રે વિલસતિ નિયતં "સચ્ચિદાનન્દરૂપઃ" ॥ ૮॥

ઇત્યેતત્તત્ત્વજાતં નવતરભુવને પ્રાચ્યપાશ્ચાત્યભાગે
યોઽયં નવ્યાવતારો ગુરુકુલતિલકો ઘોષયામાસ નાદૈઃ ।
યેનાયં ધર્મરાજ્યે સકલજનગુરુર્ભારતોઽસ્યાં ધરણ્યા
હ્યેત્યતત્ સાધિતં વૈ સુનિપુણવચસા પૂજિતઃ સર્વથાઽસૌ ॥ ૯॥

હે મુક્ત ! લોકસ્થિત-સિદ્ધસાધો !
ભક્તાધમોઽહં ન ચ કર્મલિપ્સુઃ ।
જ્ઞાનામૃતં કિં ન હિ તત્ પ્રજાને
નિરાશ્રયોઽહં શરણં પ્રયાચે ॥ ૧૦॥

ઇતિ શ્રીદક્ષિણારઞ્જનભટ્ટાચાર્યવિરચિતં
"શ્રીવિવેકાનન્દસ્તોત્રમ્" સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Vivekananda Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*